**अलिल्** पु० ऋ–इलच् रस्य लः। वेदान्तप्रसिद्धे गगनचारिणि पक्षिभेदे—“अलिलः पक्षिणः पुत्रो गगनाद्याति भूतलम्। स्वबोधाभावतः, स स्वबोधे यात्यम्बरं पुनः”। वेदा० वा०। अलिन इति पाठस्तु सम्यक्।

**अलित्रभ** पु० ६त०। १फलेरुहावृक्षे २पाटलौ।

**अलिवाहिनी** स्त्री अलिं वाहयति गन्धेन वह–णिच्–णिनि ङीप्। कोङ्कणदेशप्रसिद्धे कनकावृक्षे।

**अलीक** न० अल–ईकन् १अप्रिये, २ललाटे, च। अलति गच्छत्यधोऽनेन। ३असत्ये। मिथ्याकथने हि नरकपातः। तत्र अप्रिये “गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया” मनुः “तद्यथा स महाराजो नालीकमधिगच्छति” रामा०। विशेषेण अलीकम् व्यलीकम् अत्यन्ताप्रिये “व्यलीकनिश्वासमिवोत्ससर्ज” कुमा०। अलीकमस्त्यस्य सुखा० इनि न ठन्। अलीकी तद्वति त्रि० स्त्रियां ङीप्। अलीके भवः दिगा० यत् अलीक्यः। मिथ्याभूतभवे त्रि०।

**अलीकमत्स्य** पु० “माषपिष्टिकयालिङ्ग्य नागवल्लीदलैर्म्हत्” तत्तु संस्वेदयेद्युक्त्या स्थाल्यामङ्गारकोपरि। ततोनिष्काशितं खण्डं तिलतैलेन भर्जयेत्। अलीकमत्स्यञ्चोक्तोऽयं प्रकारः पाकपण्डितैः। तं हन्ताकं भटित्रेण वास्तूकेन च भक्षयेत्” राजनि० उक्ते पिष्टकभेदे।

**अलु** स्त्री अल–उन्। क्षुद्रकलस्याम्।

**अलुक्समास** पु० नास्ति विभक्तेः लुक्–यत्र। विभक्तेर्लुक्शून्ये समासे यथा मनसिजः सरसिजमित्यादि।

**अलुब्ध** त्रि० न लुब्धः। निर्लोभे लोभशून्ये।

**अलूक्ष** त्रि० न रूक्षः वेदे रस्य लः। रूक्षभिन्ने चिक्कणे “अलूक्षाधर्म्मकायाः” तैत्ति० उ०।

**अलेपक** त्रि० नास्ति लेपः संबन्धोयस्य वा कप्। निःसम्बन्धे परात्मनि पु०। लिप–ण्वुल् न०त०। लेपकभिन्ने त्रि०।

**अलोक** पु० न लोक्यते लोक–कर्म्मणि घञ्। अस्मदादिभिरदृश्ये १पातालादौ २अदृश्यमात्रे त्रि० “लोकालोक इवाचलः” रघुः। लोकालोकशब्दे विवृतिः। ३लोकशून्ये निर्ज्जने त्रि० ३लोकशून्ये रहसि च न० “रक्ष सर्व्वानिमान् लोकान् नालोकं कर्त्तुमर्हसि” रा०। लोकस्याभावः अभावे अव्ययी०। ४लोकाभावे अव्य०। नास्ति लोकोभोग्यलोको यस्य। ५अकृतपुण्ये त्रि० ६ऋत्विगादौ ७अलोका ऋत्विजः शत० ब्रा० तेषां दक्षिणाग्रहणेन पुण्यभागित्वाभावात् च भोग्यलोकशून्यत्वम्। ७इष्टकाभेदे स्त्री अलोका इष्टका उपदधाति”। लोकते कर्त्तरि अच्। ८दर्शकभिन्ने।

**अलोक्य** त्रि० लोकाय स्वर्गादिलोकप्राप्तये हितः तत्र साधु वा यत् न०त०। स्वर्गादिलोकासाधने। “यदलोक्यामग्निचित्याहुरथ किमचैषीरिति “सहोवाच किं नु लोक्यं किमलोक्यम् लोक्या शतायुतेत्येवाहुस्तदु ह पुरायुषः स्वःकामी न प्रेयादलोक्यं हि तत्” शत० ब्रा० “ययास्मो द्विजते वाचा नालोक्यां तामुदीरयेत्” मनुः।

**अलोभ** पु० लोभः धनादिष्वतितृष्णा अभावे न०त०। धनादिष्वतितृष्णाभावे। लोभोहि सत्यास्तेयापरिग्रहविरोधी १सति हि लोभे सत्यादयो लुप्यन्ते। “लोभस्य पुरतः कोऽमी सत्यास्तेयापरिग्रहाः” प्रबो च०। “लोभात् सद्यः प्रणश्यन्ति सत्यास्तेयापरिग्रहाः” पुरा० अतएव “लोभस्य यमादिप्रतिपक्षत्वं पातञ्जले उक्तम् “वितर्कबाधने प्रतिपक्षभावनम्” एतेषां यमनियमादीनां वितर्कैः हिंसादिसंकल्पैः “हनिष्याम्येवम्” “अनृतं वक्ष्यामि” “परस्वमादास्ये” इत्येवंरूपैः बाधने प्राप्ते सति यमपरः ब्राह्मणः प्रतिपक्षभावनं कुर्यादित्यर्थः।

**अलोभिन्** त्रि० अलोभोऽस्त्यस्य इनि लोभोऽनुपदं व्याख्यातः। तच्छून्ये “अलोभो स्यात् प्रजावित्ते स्पृहणीयात् सम्मितं करम्” भा० शा० प०।

**अलोल** त्रि० न लोलः। १अचञ्चले २वितृष्णे च।

**अलोलुप** त्रि० न०त०। लोभनीयद्रव्यस्येन्द्रियसन्निधानेऽपि अविक्रिये लोभशून्ये पुरुषे।

**अलोह** पु० पाणिन्युक्ते नड़ादिगणीये ऋषिभेदे। गोत्रापत्ये नड़ा० फक् आलोहायनः। तस्य गोत्रापत्ये पु० स्त्री०।

**अलोहित** न०त०। १लोहितभिन्ने रक्ताताम्रशून्ये। नास्ति लोहितं यस्मात्। २रक्तपद्मे रत्नमाला।

**अलौकिक** त्रि० लोके विदितः ठक् न०त०। लोकेषु अविदिते स्त्रियां ङीप्। “अधिहरि हरि ङि इत्यलौकिकं विग्रहवाक्यम्” सि० कौ०। इन्द्रियादिलौकिकसन्निकर्षाभावेऽपि २सामान्यलक्षणाद्यधीने प्रत्यक्षे न० इति नैयायिकाः तथाहि प्रत्यक्षं द्विविधं लौकिकमलौकिकञ्च। आद्यं चक्षुरादिजन्यमन्यं तदजन्यम्। तत्र सामान्यलक्षणादिसन्निकर्षजन्यमलौकिकम् ते च सन्निकर्षा अनुपदं वक्ष्यन्ते।

**अलौकिकसन्निकर्ष** पु० लोकेषु अविदितः सन्निकर्षः। “अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणा ज्ञानलक्षणा योगजोमत” इति भाषा० उक्ते प्रत्यक्षसाधनसन्निकर्षभेदे सामान्यलक्षणादिलक्षणे